# अध्याय 10 : कृषिकाः कर्मवीराः

**प्रश्न 1:**

उच्चारणं कुरुत-

| | | |
|---|---|---|
| सूर्यस्तपतु | जीर्णम् | शीतकालेऽपि |
| वारयितुम् | ग्रीष्मे | सस्यपूर्णानि |
| पदत्राणे | कण्टकावृता | क्षुधा-तृषाकुलौ |

**उत्तर 1:**

स्वयं करें-

**प्रश्न 2:**

श्लोकांशान् योजयत-

| क | ख |
|---|---|
| गृहं जीर्णं न वर्षासु | तौ तु क्षेत्राणि कर्षतः। |
| हलेन च कुदालेन | या शुष्का कण्टकावृता। |
| पादयोर्न पदत्राणे | सस्यपूर्णानि सर्वदा। |
| तयोः श्रमेण क्षेत्राणि | शरीरे वसनानि नो। |
| धरित्री सरसा जाता | वृष्टिं वारयितुं क्षमम्। |

**उत्तर 2:**

| क | ख |
|---|---|
| गृहं जीर्णं न वर्षासु | वृष्टिं वारयितुं क्षमम्। |
| हलेन च कुदालेन | तौ तु क्षेत्राणि कर्षतः। |
| पादयोर्न पदत्राणे | शरीरे वसनानि नो। |
| तयोः श्रमेण क्षेत्राणि | सस्यपूर्णानि सर्वदा। |
| धरित्री सरसा जाता | या शुष्का कण्टकावृता। |

**प्रश्न 3:**

उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

| | |
|---|---|
| **यथा**- कृषका: शीतकालेऽपि कर्मठा: भवन्ति। | आम् |
| कृषका: हलेन क्षेत्राणि न कर्षन्ति। | न |
| (क) कृषका: सर्वेभ्य: अन्नं यच्छन्ति। | |
| (ख) कृषकाणां जीवनं कष्टप्रदं न भवति। | |
| (ग) कृषक: क्षेत्राणि सस्यपूर्णानि करोति। | |
| (घ) शीते शरीरे कम्पनं न भवति। | |
| (ङ) श्रमेण धरित्री सरसा भवति। | |

**उत्तर 3:**

| | |
|---|---|
| **यथा**- कृषका: शीतकालेऽपि कर्मठा: भवन्ति। | आम् |
| कृषका: हलेन क्षेत्राणि न कर्षन्ति। | न |
| (क) कृषका: सर्वेभ्य: अन्नं यच्छन्ति। | आम् |
| (ख) कृषकाणां जीवनं कष्टप्रदं न भवति। | न |
| (ग) कृषक: क्षेत्राणि सस्यपूर्णानि करोति। | आम् |
| (घ) शीते शरीरे कम्पनं न भवति। | न |
| (ङ) श्रमेण धरित्री सरसा भवति। | आम् |

**प्रश्न 4:**

मञ्जूषातः पर्यायवाचिपदानि चित्वा लिखत-

| रविः | वस्त्राणि | जर्जरम् | अधिकम् | पृथ्वी | पिपासा |
|---|---|---|---|---|---|

| | |
|---|---|
| वसनानि | ..................... |
| सूर्यः | ..................... |
| तृषा | ..................... |
| विपुलम् | ..................... |
| जीर्णम् | ..................... |
| धरित्री | ..................... |

**उत्तर 4:**

| | |
|---|---|
| वसनानि | **वस्त्राणि** |
| सूर्यः | **रविः** |
| तृषा | **पिपासा** |
| विपुलम् | **अधिकम्** |
| जीर्णम् | **जर्जरम्** |
| धरित्री | **पृथ्वी** |

**प्रश्न 5:**

मञ्जूषातः विलोमपदानि चित्वा लिखत-

| | | | | | |
|---|---|---|---|---|---|
| धनिकम् | नीरसा | अक्षमम् | दुःखम् | शीते | पाश्व |

| | |
|---|---|
| सुखम् | ...................... |
| दूरे | ...................... |
| निर्धनम् | ...................... |
| क्षमम् | ...................... |
| ग्रीष्मे | ...................... |
| सरसा | ...................... |

**उत्तर 5:**

| | |
|---|---|
| सुखम् | **दुःखम्** |
| दूरे | **पार्श्वे** |
| निर्धनम् | **धनिकम्** |
| क्षमम् | **अक्षमम्** |
| ग्रीष्मे | **शीते** |
| सरसा | **नीरसा** |

**प्रश्न 6:**

प्रश्नानाम् उत्तराणि लिखत-

(क) कृषकाः केन क्षेत्राणि कर्षन्ति?

(ख) केषां कर्मवीरत्वं न नश्यति?

(ग) श्रमेण का सरसा भवति?

(घ) कृषकाः सर्वेभ्यः किं किं यच्छन्ति?

(ङ) कृषकात् दूरे किं तिष्ठति?

**उत्तर 6:**

(क) कृषकाः हलेन कुदालेन च क्षेत्राणि कर्षन्ति।

(ख) कृषकाणां कर्मवीरत्वं न नश्यति।

(ग) श्रमेण पृथ्वी सरसा भवति।

(घ) कृषकाः सर्वेभ्यः शाकम्, अन्नम्, दुग्धाम्, फलम् च यच्छन्ति।

(ङ) सुखम् कृषकात् दूरे तिष्ठति।